# Gaurikrita Ambikesha Shiva Stuti

# ગૌરીકૃતા અમ્બિકેશશિવસ્તુતિઃ

## Document Information

Text title : Gaurikrita Ambikesha Shiva Stuti

File name : ambikeshashivastutiHgaurIkRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhavAkhyaH dvitIyAMshaH | adhyAyaH 5 | 54-59, 60-72||

Latest update : September 16, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# ગૌરીકૃતા અમ્બિકેશશિવસ્તુતિઃ

(અમ્બિકેશશિવસ્તુતિઃ)
હર હર શઙ્કર ચન્દ્રશેખર પ્રમથાધીશ્વર વિશ્વનાથ શમ્ભો ।
કરુણારસસારશોભિતાઙ્ગાઙ્ગદકાહીશ્વર દેવદેવ પાહિ (દેવ પાહિ પાહિ) ॥ ૫૪॥

અમ્બિકેશ ગગનાતિગમૌલે લમ્બિતોરુજટયાખિલકાશ ।
વ્યોમકેશ વિનતાર્તિવિનાશ નાગભૂષણક (નાગભૂષ નગ) કાર્મુકપાણે ॥ ૫૫॥

હરિબાણામલપદ્મનેત્ર શમ્ભો કૃતદક્ષાધ્વરશિક્ષવીક્ષણ ।
દગ્ધકામપુરવર્ગ મદોદ્યત્કુમ્ભિકુમ્ભદલનામલપાદ ॥ ૫૬॥

ગિરિરાજસુતા(સુતાં)જટોરુબન્ધ હ્યવ (અવ) માં ઘોરતપોભિરુગ્રદેહામ્ ।
ભવ ભીમોગ્ર કપાલમાલજાલિન્કરશૂલામલભૂતિભૂષિતાઙ્ગ ॥ ૫૭॥

ત્યદ(ત્વદ)પાઙ્ગતતિપ્રભૂતકામા કિમિહેહામિ
તવાવૃતેર્મમાદ્ય (તવાદૃતેઽહમાદ્ય, તવાદતે(?)ઽહમદ્ય) ।
ગણનાથષડાનનાદિસેવ્ય પ્રકટાપારશ્રુતીભિરીડ્યપાદ ॥ ૫૮॥

દહરગગનસંસ્થ વિશ્વનાથ (વિશ્વધામ) પ્રમથાધીશ નતાસ્મિ તે પદાબ્જમ્ ॥ ૫૯॥

- -
(પૂજાફલવર્ણનમ્) -
સ્કન્દઃ -
ઇત્થં સમ્પૂજ્ય સા દેવી કૈલાસાચલમૂર્ધનિ ।
અમ્બિકેશં મહાલિઙ્ગમમ્બિકાભક્તિતત્પરા ॥ ૬૦॥

પ્રણનામ મુહુર્ભક્ત્યા દૃષ્ટ્વા લિઙ્ગમુપાતેઃ ।
મહાનન્દામ્બુધૌ મગ્ના નાન્યજ્જાનાતિ કિઞ્ચન ॥ ૬૧॥

એવં તત્રાર્ચનરતા દ્વાદ શાબ્દં કિલામ્બિકા ।
ત્રિકાલં સાવધાનેન પ્રદોષેષુ વિશેષતઃ ॥ ૬૨॥

મહાકૈલાસશૈલાગ્રેચામ્બિકેશશિવાલયે ।
(મહાકૈલાસશૈલાગ્રેઽપ્યમ્બિકેશશિવાલયે ।)
અપૂજયત્તદા દેવીચામ્બિકેશં દ્વિજોત્તમ ॥ ૬૩॥

નક્તાશનરતા દેવી સ્વસસખીભિઃ પરીવૃતા ।
તરુણેન્દુકલામૌલિલિઙ્ગં સમ્પશ્યતી સદા ॥ ૬૪॥

નિનાય સા ક્ષપાસ્તત્ર મહાદેવી સદા મુદા ।
સ્વયં સખીભિઃ સહિતા કુસુમાપચયોદ્યતા ॥ ૬૫॥

કૈલાસમૌલિવિપિને પુષ્પસારયુતે તદા ।
ફુલ્લાનિનીષુઃ (ફુલ્લાબ્જિનીષુ) સતતં પઙ્કજાહરણાદરા ॥ ૬૬॥

બિલ્વકણ્ટકનુન્નાપિ સ્વયમેવાહરચ્છિવા ।
ફલાનિ સ્વાદુભૂતાનિ સમાહૃત્યામ્બિકેશ્વરે (અમ્બિકેશ્વરમ્) ॥ ૬૭॥

નિવેદ્યાશ્નાતિ (નિનેદ્ય સ્નાતિ) નિયતં સખીભિઃ સહિતા શિવા ।
યન્નિવેદિતમીશાને તદશ્નાતિ કુતૂહલાત્ ॥ ૬૮॥

પવિત્રં શિવનૈવેદ્યં જ્ઞાનપ્રદમનુત્તમમ્ ।
જિતામૃતરસાસ્વાદં (જિતામૃતરસંસ્વાદુ) પાપસઙ્ઘવિનાશનમ્ ॥ ૬૯॥

આસ્વાદ્ય શિવનૈવેદ્યં જલમન્નં ફલાદિકમ્ ।
દેવી હૃષ્ટતરા નિત્યમષ્ટમૂર્ત્યર્ચને રતા ॥ ૭૦॥

સ્વતપોત્થં કષ્ટજાલં જહૌ લિઙ્ગસમર્ચનાત્ ॥ ૭૧॥

દેવ્યા કૈલાસમૌલૌ સતતપરિચિતાપારપૂજાપ્રભાવૈઃ
તુષ્ટશ્ચૈવામ્બિકેશો ગુણગણસહિતઃ (ગણગણસહિતઃ)
પ્રદુરાસીન્મહેશઃ (પ્રાદુરાસીન્મહેશઃ)।
દેવીં વીક્ષ્ય મુદાહ ગાઢભુજકૈરાલિઙ્ગ્ય ધન્યેઽમ્બિકે
કો વેત્તિ પ્રભવં (પ્રસભં) મમેષ્ટદ મહાલિઙ્ગાર્ચનાયાઃ ફલમ્ ॥ ૭૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભવાખ્યે ગૌરીકૃતા અમ્બિકેશશિવસ્તુતિઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભવાખ્યઃ દ્વિતીયાંશઃ । અધ્યાયઃ ૫ । ૫૪-૫૯, ૬૦-૭૨॥

- .. shrIshivarahasyam . bhavAkhyaH dvitIyAMshaH . adhyAyaH 5 . 54-59, 60-72..

Notes:

Skanda સ્કન્દ describes worship of Ambikeśa-Śiva અમ્બિકેશશિવ in form of Ambikeśa-Mahāliṅga અમ્બિકેશમહાલિઙ્ગ as conducted by Devī દેવી (Gaurī ગૌરી) who is keen on having Śiva શિવ as Her Husband. Pleased with Her Devotion, Ambikeśa-Śiva અમ્બિકેશશિવ appears to Her, and is willing to grant the fruits of Her penance.

Selected verses from the detailed description are presented here.

Proofread by Ruma Dewan

*Gaurikrita Ambikesha Shiva Stuti*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*